International Journal of Sanskrit Research 2021; 7(6): 226-228

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 226-228
© 2021 IJSR
www.anantaajournal.com
Received: 10-09-2021
Accepted: 18-10-2021

**अरुनांशुमण्डलः**
शोधच्छात्रः,
कलिकाताविश्विद्यालयस्य,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**अरुनांशुमण्डलः**
शोधच्छात्रः,
कलिकाताविश्विद्यालयस्य,
पश्चिम बंगाल, भारत

# निःश्रेयः संशयापेक्षम्

**अरुनांशुमण्डलः**

"ततः परं ब्रह्मपरं वृहन्तं यथानिकायं सर्वभूतेषु गूढम्।
विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वामृता भवन्ति।।"[1]

निःश्रेयस् इत्यत्र निर् इत्यस्यार्थः निश्चयः, श्रेयस् इत्यस्य चार्थः मङ्गलम्। अतः निःश्रेयश्शब्देन निश्चितपरममङ्गलं बोध्यते। जीवानां जन्ममृत्यू एव परमम् अमङ्गलम्। जन्ममरणावर्तनमेव दुःखानां मूलम्। जन्ममृत्योः चिरात् नाश एव परमं कल्याणं, सैव च मुक्तिः। गीतायां जन्ममृत्युजरा दुःखरूपेणाभिहिताः। उक्तश्च –

**'जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते'**[2]

एतौ जन्ममृत्यू एव जीवानां बन्धनम्। बन्धननाशादेव मुक्तिर्भवति। तथाहि न्यायसूत्रे - 'बाधनालक्षणं दुःखम्' [3]।

अत आत्यन्तिकदुःखनाश एव मुक्तिरित्युच्यते। जन्म एव दुःखम्। अत आत्यन्तिकरूपेण जन्मनो नाश एव मुक्तिः निःश्रेयः वा। किं वा मुक्तो पुरुषः पुनर्न जायते। अस्मिन् प्रसङ्गे श्रुतौ आम्नातं - 'न स पुनरावर्तते'[4], 'तेषां न पुनरावृत्तिः'[5]।

अतः निःश्रेयस् इति पदेन मुक्तिरेव बोध्यते। निःश्रेयस् इति पदं कुत्रापि श्रेयस् इत्यस्मिन् अर्थेऽपि प्रयुज्यते। अस्य व्युत्पत्तिरस्ति - 'निःश्रेयस् निर्निश्चितं श्रेयः, ततोऽच् समासान्तः 'अचुरविचतुरेति'[6]।

निःश्रेयसं निर्निश्चितं श्रेयः 'अचुरविचतुरेति' पाणिनिरिति निपातनात् साधुः।

निःश्रेयस् इति पदस्य प्रतिशब्दः मुक्तिः, कैवल्यं, निर्वाणं, श्रेयस्, अमृतं, मोक्षः, अपवर्गश्चेति।

अतः अमरकोषे अस्ति - 'मुक्तिः कैवल्यनिर्वाणं श्रेयो निःश्रेयसामृतं मोक्षोऽपवर्गः'[7]

आस्तिकनास्तिकभेदेन भारतीयदर्शनं द्विविधम्। पाणिनीयसूत्रे दृश्यते – **'अस्ति नास्ति दिष्टं मतिः'** [8] । ये वेदप्रामाण्यमङ्गीकुर्वन्ति ते आस्तिकाः, ये खलु वेदप्रामाण्यं नाङ्गीकुर्वन्ति ते नास्तिकाः। तत्रास्तिकदर्शनानि षट् – सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा- उत्तरमीमांसाभेदेन।

---

[1] श्वेताश्वेतरोपनिषत् – ३/७
[2] गीता – १४/२०
[3] न्यायसूत्रम् - १/१/२१
[4] छा.उ. – ८/१५/१
[5] वृह.उ. – ६/२/१५
[6] अष्टाध्यायी – ५/४/७७
[7] अमरकोषः, प्रथमकाण्डः, धीवर्गः, पृ. - ५७
[8] अष्टाध्यायी - ४.४.६०

नास्तिकदर्शनानि हि त्रीणि चार्वाकबौद्धजैनभेदेन। तेषु दर्शनेषु न्यायदर्शनं भवति सर्वशास्त्रप्रदीपस्वरूपम्।

"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तितः।।"[9] इति।

धर्मार्थकाममोक्षचतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थ इति सर्वैः दार्शनिकैः स्वीकृतम्। मोक्षस्यार्थः मुक्तिरिति। सा मुक्तिस्तु आत्मज्ञानेनैव भवति।

भारतीयास्तिकदर्शने तु आत्ममुक्तये पथनिर्देशं कुर्वन्ति तत्रत्याः विभिन्नाः सम्प्रदायाः। तत्र तत्र न्यायसूत्रकारेण महर्षिणा गौतमेन पदार्थानां तत्त्वज्ञानात् मोक्षसिद्धिः इति स्वीकृतम्। तद्यथा – 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः'[10] इति।
संशयो वस्तुतस्तु अनिश्चितज्ञानमिति। सम्पूर्वकात् शीधातोः अच्प्रत्ययये संशयशब्दो निष्पद्यते। तथाहि न्यायसूत्रकारेण महर्षिणा गौतमेनोक्तं - 'समानानेक-धर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः'[11] इति। लक्षणे उल्लिखितः संशयशब्दो लक्ष्यनिर्देशः विमर्शशब्देन सामान्यललक्षणं सूच्यते। विशेषापेक्षपदेन प्रतिबन्धकत्वे सति विशेषधर्मस्य स्मरणं सूच्यते। विमर्ष इत्यत्र विशब्दार्थः विरोध इति। पुनश्च मृश्-धातोरर्थः ज्ञानमिति। अर्थाद् एकस्मिन् धर्मिणि विरुद्धनानाधर्मस्य ज्ञानमेव संशय इति। वैशेषिकाचार्येणापि उक्तं – 'सामान्यप्रत्यक्षाद् विशेषप्रत्यक्षाद् विशेषस्मृतेश्च संशयः'[12] इति। अर्थात् सामान्यस्य उपलब्धिर्विशेषस्य चानुपलब्धिस्तेन स्मरणाच्च संशयो भवति। यथा – अयं स्थाणुः पुरुषो वा। अत्र परस्परविरुद्धधर्मरूपेण स्थाणुत्वं पुरुषत्वं वा परिलक्ष्यते। अत्र केवलं दीर्घतादिसामान्यधर्मदर्शनेन वल्कलादिविशेषधर्मस्मरणेन च संशयो जायते। अत्र विरुद्धभावोभयकोटिकसंशयः स्वीकृतः। उपस्कारटीकायां शङ्करमिश्रेणाप्युक्तम् - 'एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशयः'[13]।
नव्यनये विरुद्धभावाभावचतुष्कोटिकः संशयः स्वीक्रियते। तेषां मते नञ्-शब्दस्य प्रयोगं विना कोटिद्वयस्य विरोधः स्पष्टरूपेण न प्रतीयते। अतः संशयबोधकवाक्ये नञ्-शब्दस्य प्रयोगः अत्यावश्यकः। यथा – 'अयं स्थाणुर्न पुरुषो न वे'ति। अत्र स्थाणुत्वं स्थाणुत्वाभावः, पुरुषत्वं पुरुषत्वाभावश्चेति भावाभावसंशयः स्वीकृतः। भाषापरिच्छेद-कारेणापि विश्वनाथन्यायपञ्चाननेन तदुच्यते - 'स संशयो मतिर्या स्यादेकत्राभाव-भावयोः'[14] इति। यथा नरो वा स्थाणुर्वा। अत्र वाशब्देन 'अभावः' स्वीक्रियते। अतोऽत्र न तु एकः संशयः अपि तु संशयद्वयमिति। तत्रैव मुक्तावलीकारेणोक्तम् – 'एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः'[15] इति। अन्नंभट्टेनाप्युक्तम् – 'एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः'[16] इति। यथा स्थाणुर्वा पुरुषो वा। अत्र तर्कसंग्रहकारेण भावाभावस्थले विरुद्धनानाधर्म इति पदं प्रयुक्तम्। शिवादित्यकृतसप्तपदार्थीग्रन्थेऽप्युक्तम् - 'अनवधारणं ज्ञानं संशयः'[17]।
संशयः न्यायप्रवृत्तिमूलम्। यथा अज्ञातपदार्थे तथा ज्ञातपदार्थे न्यायो न प्रवर्तते। केवलं सन्दिग्धे विषये न्यायः प्रवर्तते। नानुपलब्धे न निर्णीते अर्थे न्यायः प्रवर्तत, किं तर्हि? संशयितेऽर्थे। संशयं विना अर्थावधारणं न भवति, कारणं संशयादनन्तरमेव पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयो भवतीति। विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः इति। अर्थात् पक्षप्रतिपक्षाभ्यां संशयदूरीकरणेन एकमतसंस्थापनेन तत्त्वं निर्णीयते। यद्यपि निर्णयः संशयपूर्व इति सर्वदा वक्तुं न शक्यते कारणं प्रत्यक्षादिस्थले निर्णयात् प्राक् संशयो न दृश्यते। सर्वदा निर्णयः संशयपूर्वो न भवत्यपि विचारस्तु संशयपूर्वो भवत्येव। अतः सर्वत्रैव संशयपूर्वको विचारो दृश्यते। वाचस्पतिमिश्रेणोक्तं – 'न निर्णयः सर्वः संशयपूर्वः विचारः सर्व एव संशयपूर्वः शास्त्रवादयोश्चास्ति विचारः'[18] इति। तेन विचारः सदा संशयपूर्वक इति ध्येयम्। शिष्टयोश्च वादिप्रतिवादिनोः शास्त्रे विमर्शपूर्वो विचार इति सिद्धम्। संशयादनन्तरं पक्षप्रतिपक्षाभ्यामेकमतसंस्थापनेनार्थावधारणेन न्यायविद्याया दृष्टनिःश्रेयसरूप-गौणाप्रयोजनं सिद्ध्यते।
संशयो मोक्षरूपादृष्टनिःश्रेयसप्राप्तौ परम्परापि सहायिका भवति। अनादि-कालादारभ्य जीवा मिथ्याज्ञानवशादेव संसारसागरे निमग्ना भवन्ति। आत्मोलब्ध्या मिथ्याज्ञानस्य निवृत्तिर्भवति। तेनैव परम्परया दोष-प्रवृत्ति-जन्म-दुःखानां निवृत्तिः भवति। यदुक्तं – 'दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तरापायापवर्गः'[19] इति। तत्र दुःखस्यात्यन्तिकनिवृत्तिरेव मोक्ष इति। अत आत्मज्ञानेनैव भवति मुक्तिरिति। किन्तु आत्मज्ञानस्यैव जिज्ञासा तावन्न भवति यावत् तस्मिन् विषये संशयो भवति। गौतमोक्तसंशयादिपदार्थानां तत्त्वज्ञानं लभ्यते चेत् तेन बहुदृष्टनिःश्रेयसः प्राप्तिर्भवति। तेन सहायेन श्रुतिबोधितात्मादिपदार्थस्य मननं सम्पाद्य

---

9 वात्स्यायनभाष्यम् – १
10 न्यायसूत्रम् – १.१.१
11 न्यायसूत्रम् – १.१.२३
12 वैशेषिकदर्शनम् – २/२/१७
13 वैशेषिकदर्शनम्, उपस्कारटीका - २/२/१७
14 भाषापरिच्छेदः, कारिका – १३०
15 भाषापरिच्छेदे, मुक्तावली, कारिका - १३०
16 तर्कसंग्रहः, नारायणचन्द्रगोस्वामी, पृ. - ५७२
17 सप्तपदार्थी, तपनशङ्करभट्टाचार्यः, पृ.- ३८१
18 तात्पर्यटीका
19 न्यायसूत्रम् – १.१.२

मोक्षमन्दिररूपतृतीये सोपाने उपविश्य च आत्मादिप्रमेयपदार्थानां साक्षात्कारेणैव अदृष्टनिःश्रेयसः प्राप्तिर्भवति। यच्च परमं प्रयोजनम्। तेनैव भवति मनुष्यः कृतकृत्यः। अतः संशयः निःश्रेयसप्राप्तौ साक्षात् सहायको नापि भवति चेत् परम्परया भवति।

## संदर्भ


1. अन्नंभट्टः. *तर्कसंग्रहः*. सम्पा. अनामिकारायचौधुरी. कलिकाता : संस्कृत पुस्तक भाण्डार, १४१३ (बङ्गाब्दः)।
2. अन्नंभट्टः. *तर्कसंग्रहः*. सम्पा. सत्करिशर्मा. वाराणसी : चौखम्बाविद्याभवनम्, १९६९.
3. गौतमः. *न्यायदर्शनम्* (प्रथमः खण्डः). सम्पा. फणिभूषणतर्कवागीशः. कलिकाता :
4. पश्चिमबङ्गराज्यपुस्तकपर्षत्, २०११ (चतुर्थसंस्करणम्)।
5. जयन्तभट्टः. *न्यायमञ्जरी.* सम्पा. अमितभट्टाचार्यः. कलिकाता : संस्कृत वुक् डिपो, २००६ (प्रथमसंस्करणम्)।
6. तर्कवागीशः, फणिभूषणः. *न्यायपरिचयः.* कलिकाता : बङ्गीयसाहित्यपरिषत्. २४२३ (बङ्गाब्दः)।
7. प्रशस्तपादाचार्यः. *प्रशस्तपादभाष्यम्.* सम्पा. दुर्गाधरशर्मा. वाराणसी : विद्यामन्दिर प्रेस प्राइभेट् लिमिटेड्, १८८५.
8. वाचस्पतिमिश्रः. *न्यायवार्त्तिकतात्पर्यटीका.* सम्पा. राजेश्वरशास्त्री. वाराणसी : चौखम्बा संस्कृत सिरिज, १९२५.
9. विश्वनाथन्यायपञ्चाननभट्टाचार्यः. *भाषापरिच्छेदः.* सम्पा. अनामिकारायचौधुरी. कलिकाता: संस्कृत पुस्तक भाण्डार, २०१३ (चतुर्थसंस्करणम्).
10. शिवादित्यः. *सप्तपदार्थी.* सम्पा. तपनशङ्करभट्टाचार्यः. कलिकाता : संस्कृत वुक् डिपो, २०१२.